# Yoga Adhipati Shri Ganesha Stuti

# યોગાધિપતિશ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Yoga Adhipati Shri Ganesha Stuti

File name : yogAdhipatishrIgaNeshastutiH.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM navamaH khaNDaH | adhyAyaH 4 | 9.4 3-39||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# યોગાધિપતિશ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

અયોગ ઉવાચ ।

શાન્તિસ્વરૂપાય સુશાન્તિદાય વાણીમનોહીનતમાય ઢુણ્ઢે ।
વાણીમનોયુક્તવિચારિણે વૈ યોગાય યોગાધિપતે નમસ્તે ॥ ૩॥
વાણીમનોયુક્તમયં વદામિ નો વિશ્વરૂપોઽસિ કથં સ્તવીમિ ।
નિત્યં ગણેશાય નમો મહાત્મન્ યોગાય યોગાધિપતે નમસ્તે ॥ ૪॥
વાણીમનોહીનમયં કથં ત્વાં બ્રુવેઽદ્ય સંયોગમયં કદા ચ ।
નો યોગરૂપં ત્વથ તે નમો વૈ યોગાય યોગાધિપતે નમસ્તે ॥ ૫॥
ત્વત્તઃ પ્રસૂતાનિ મહાનુભાવ બ્રહ્માણિ વિશ્વાનિ પરાણિ ભૂયઃ ।
ત્વય્યેવ લીનાનિ હ્યભિન્નભાવાદ્યોગાય યોગાધિપતે નમસ્તે ॥ ૬॥
નિત્યં હ્યયોગાય નિવૃત્તિદાય માયાવિહીનાય ગણાધિપાય ।
વાણીમનોહીનતયા સુલભ્ય યોગાય યોગાધિપતે નમસ્તે ॥ ૭॥
સ્વાનન્દરૂપાય સુશાન્તિદાય સિદ્ધ્યા ચ બુદ્ધ્યા સહ ખેલકાય ।
વાણીમનોહીન નિજાત્મલભ્ય યોગાય યોગાધિપતે નમસ્તે ॥ ૮॥
અવ્યક્તરૂપાય ચ સાહજાય મોહેન હીનાય સદા શિવાય ।
ત્રૈવિધ્યનાથાય ચ નેતિ કર્ત્રે યોગાય યોગાધિપતે નમસ્તે ॥ ૯॥
સામાન્યરૂપાય ત્રયીમયાય દ્વન્દ્વપ્રકાશાય ચ વિષ્ણવે તે ।
આનન્દનાથાય સુખેલકાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૦॥
આત્મસ્વરૂપાય સદાઽમૃતસ્થયોગેન સંલભ્યતમાય ભાનો ।
ભેદૈર્વિહીનાય ચ જીવનાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૧॥
નાનાપ્રભેદેષુ ચ તન્મયાય સર્વસ્વરૂપાય ચ શક્તયે તે ।
આનન્ત્યભાવૈશ્ચ સુમોહદાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૨॥
સાક્ષિસ્વરૂપાય ચ સાઙ્ખ્યયોગલભ્યસ્વરૂપાય સદાત્મસંસ્થ ।
બોધેન હીનાય પરાત્પરાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૩॥
બોધસ્વરૂપાય સઙ્ખ્યાવિહારકર્ત્રે સદા પાલકભાવધારિન્ ।

ત્રૈવિધ્યનાથાય મહોદરાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૪॥
સોઽહંસ્વરૂપાય ચ ચિન્મયાય મોહેન યુક્તાય ચ હીનકાય ।
દેહિસ્વરૂપેણ વિહારકર્ત્રે યોગાય યોગાધિપતે નમસ્તે ॥ ૧૫॥
બિન્દુપ્રચુરાય ચતુષ્પદાય ચતુર્વિધેષુ પ્રભવાય તુભ્યમ્ ।
આનન્ત્યતત્ત્વાય ચ દેહભોક્ત્રે યોગાય યોગાધિપતે નમસ્તે ॥ ૧૬॥
તુર્યાત્મદેહાય લયાત્મકાય કાલસ્વરૂપાય ગણેશ્વરાય ।
નાદાત્મકાયાઽથ ત્રિદેહગાય યોગાય યોગાધિપતે નમસ્તે ॥ ૧૭॥
આનન્દકોશાત્મકસંસ્થિતાય પ્રાજ્ઞાય સૌષુપ્તમયાય તુભ્યમ્ ।
નિત્યેશ્વરાયૈવ તયોઃ પ્રચારિન્ યોગાય યોગાધિપતે નમસ્તે ॥ ૧૮॥
સર્વાન્તરસ્થાય ચ સૂક્ષ્મકાય સ્વપ્નપ્રચુરાય ચ તૈજસાય ।
હિરણ્યગર્ભાય તયોઃ પ્રચારિન્ યોગાય યોગાધિપતે નમસ્તે ॥ ૧૯॥
બાહ્યસ્થિતાયાન્નમયાય વિશ્વવૈશ્વાનરાયૈવ તયોઃ પ્રચારિન્ ।
સ્થૂલસ્વરૂપાય ચ જાગૃદાસ્થ યોગાય યોગાધિપતે નમસ્તે ॥ ૨૦॥
વિશ્વસ્યદ્વૈવિધ્યમયાય તુભ્યં નાનાણ્ડરૂપાય ચ ખેલકાય ।
શક્ત્તે ચ ધાત્રે હરયે શિવાય યોગાય યોગાધિપતે નમસ્તે ॥ ૨૧॥
એતે ગણેશાધિપતે કલાંશા વિઘ્નેશ્વરાસ્તે ગણનાયકાય ।
ન ત્વં સદૈતૈઃ સહિતો હિ તુભ્યં યોગાય યોગાધિપતે નમસ્તે ॥ ૨૨॥
સ્તુમઃ કથં નાથ ગણેશરૂપં સંયોગહીનં ચ હ્યયોગહીનમ્ ।
તાદાત્મ્યરૂપં ભવ તુષ્ટચિત્તં યોગાય યોગાધિપતે નમસ્તે ॥ ૨૩॥
મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં પ્રણનામ કૃતાઞ્જલિઃ ।
અયોગસ્તં ગણાધીશો જગાદ ઘનનિઃસ્વનઃ ॥ ૨૪॥
(ફલશ્રુતિઃ ।)
ગણેશ ઉવાચ ।
વરાન્ વૃણુ મહાભાગ મનસીપ્સિતરૂપકાન્ ।
દાસ્યામિ ભક્તિતુષ્ટોઽહં સ્તોત્રેણાનેન યોગપ ॥ ૨૫॥
ત્વયા કૃતમિદં સ્તોત્રં યોગશાન્તિપદપ્રદમ્ ।
પઠતાં શ્રૃણ્વતાં નિત્યં નાનાસિદ્ધિપ્રદં ભવેત્ ॥ ૨૬॥
યં યમિચ્છસિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
મયિ પ્રીતિકરં ચાસ્તુ ભક્તિભાવપ્રદં તથા ॥ ૨૭॥
એકવિંશતિવારં ચૈકવિંશતિ દિનાવધિ ।
પઠતે તસ્ય સર્વં ચ દાસ્યામિ દુર્લભં હિ ચેત્ ॥ ૨૮॥

એવમુક્ત્વા ગણેશાનઃ સસ્વજે તં ગણાધિપમ્ ।
અયોગરૂપિણં હર્ષસંયુક્તં પ્રચકાર હ ॥ ૨૯॥
તતોઽયોગો ગણાધ્યક્ષં પ્રણમ્ય ચ પુનઃ પુનઃ ।
જગાદ ભક્તિસંયુક્તો હૃષ્ટરોમા સુહર્ષિતઃ ॥ ૩૦॥
અયોગ ઉવાચ ।
યદિ ઢુણ્ઢે વરાન્ મે ત્વં દાસ્યસિ ભક્તિમોહિતઃ ।
તદા તે પાદયુગ્મે મે ભક્તિં દેહિ દૃઢાં પરામ્ ॥ ૩૧॥
પૂર્ણયોગસ્વરૂપસ્થં માં કુરુષ્વ ગજાનન ।
સુખં મુક્તસ્વરૂપસ્થં નાથ નેચ્છામિ તે નમઃ ॥ ૩૨॥
મુદ્ગલ ઉવાચ ।
અયોગગણરાજસ્ય શ્રુત્વા વચનમુત્તમમ્ ।
જગાદ તં ગણેશાનસ્તથેત્યન્તર્હિતોઽભવત્ ॥ ૩૩॥
અયોગસ્તં હૃદિ સ્થાપ્ય ભજતેઽનન્યમાનસઃ ।
અન્તે યોગમયઃ સોઽપિ બભૂવે મોક્ષનાયકઃ ॥ ૩૪॥
ઇતિ તે સર્વમાખ્યાતં ચરિતં શ્રીગણપસ્ય યત્ ।
પૂર્ણયોગધરસ્યાપિ સમાસેન પ્રજાપતે ॥ ૩૫॥
અતસ્ત્વં ગણરાજં તં ભજસ્વ ભક્તિસંયુતઃ ।
તેન યજ્ઞમિમં પૂર્ણં કરિષ્યસિ ન સંશયઃ ॥ ૩૬॥
અન્તે યોગયુતશ્ચૈવ બ્રહ્મભૂતો ભવિષ્યસિ ।
આજ્ઞાં દેહિ ગમિષ્યામિ ત્વદાતિથ્યસુતોષિતઃ ॥ ૩૭॥
રહસ્યં ગણનાથસ્ય કથિતં સકલં મયા ।
નાન્યત્ કિઞ્ચિદતો દક્ષ પરં વેદાદિસમ્મતમ્ ॥ ૩૮॥
શ ૃણુયાદ્યઃ પઠેદ્વાઽપિ સ સર્વં પ્રાપ્નુયાચ્છુભમ્ ।
અન્તે યોગમયો ભૂત્વા સન્તિષ્ઠેત્ ગણપાત્મકઃ ॥ ૩૯॥

ઇતિ યોગાધિપતિશ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥
એકવિંશતિસ્તોત્રં
- ॥ મુદ્ગલપુરાણં નવમઃ ખણ્ડઃ । અધ્યાયઃ ૪ । ૯.૪ ૩-૩૯॥

- .. mudgalapurANaM navamaH khaNDaH . adhyAyaH 4 . 9.4 3-39..

Proofread by Yash Khasbage, Preeti Bhandare

*Yoga Adhipati Shri Ganesha Stuti*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*